# राज्ञः पथप्रदर्शकोऽमात्यः

**हेतरामकछवाहः**

अमात्यति। 'अमा' शब्दः सहार्थे, अमा राज्ञा सह, अतन्ति चरन्ति सर्वेषु कार्येषु इत्यमात्या, मन्त्र्यादयः। अमात्यः, सचिवः, मन्त्री चेति शब्दत्रयमेकार्थकम्। ऋग्वेदे राजवदेव अमात्यस्यापि स्थानं स्वीकृतम् 'कृणुष्व पाजः प्रसितिं न पृथिवीं याहि राजेवामवाँ इमेन।' अत्र निरुक्ते इत्थं वर्णितम्— 'याहि राजा इव अमात्यवान्, अभ्यमनवान्, स्ववान् वा। अमात्यशब्दः ऋग्वेदे प्रयुक्तः, परन्तु न तत्र तस्य मन्त्रिरूपोऽर्थः। बौधायनपितृमेधसूत्रे अमात्यशब्दः प्रयुक्तः। आपस्तम्बधर्मसूत्रे मन्त्रिरूपेऽर्थे अमात्यशब्दः उल्लिखितः। तत्र हि राज्ञः कृते मन्त्रिण आवश्यकत्वमुक्तम्। एष च मन्त्री अमात्यशब्देन निर्दिष्टः। सचिवशब्दः ऐतरेयब्राह्मणे दृश्यते। तत्र हि मरुद् इन्द्रस्य सचिव इति कथितम्। अर्थशास्त्रे धर्मशास्त्रे स्मृतिषु च मन्त्रिण आवश्यकत्वं बहुशः प्रतिपादितम्। जूनागढ़स्थशिलालेखे रुद्रदाम्नः सचिवः इत्थं वर्णितः—अस्मिन्नर्थे महाक्षत्रपस्य मतिसचिव-कर्मसचिवैरमात्यगुणसमुद्युक्तैरतिमहत्त्वाद् भेदस्यानुत्साहविमुख-मतिभिः प्रत्याख्यातारम्भम्। अत्र परामर्शदातारः कार्यकर्तारश्चेति द्विविधाः सचिवाः। अमात्यसचिवशब्दौ प्रायः पर्यायतया प्रयुक्तौ। अमरकोशेऽपि मतिसचिवः कर्मसचिवश्चेति द्वौ सचिवौ उक्तौ 'मन्त्री धीसचिवोऽमात्योऽन्ये कर्मसचिवास्ततः।' रामायणे सुमन्त्रः अमात्यशब्देन परामर्शदातृतया च निर्दिष्टः। परञ्चायोध्याकाण्डे इदं भेदद्वयमपि व्यवस्थापितमस्ति। आचार्यकौटिल्येनापि अमात्याद् मन्त्री पार्थक्येन निर्दिष्टः—

**विभज्यामात्यविभवं देशकालौ च कर्म च ।**
**अमात्या सर्व एवैते कार्याः स्युर्न तु मन्त्रिणः[१] ।।**

किञ्च आधुनिकभारतवर्षस्य प्रमुखनीतिकारस्तत्र भवान् कौटिल्योपनामयुक्तो विष्णुगुप्तो महामात्येति पदेन सर्वत्र नीतिविद्यासु प्रतिष्ठितः। अयञ्चाचार्यः भारतवर्षस्य परवर्तिकाले कौटिल्यार्थशास्त्रनामको ग्रन्थः व्यरचि, यस्मिन् शुक्रनीति-विदुरनीति-रामायण-महाभारतादिनीतीनां सम्यक् व्यवस्थापनं दृश्यते। अमात्यशब्दस्य षोडशकलात्मिकायाः महादेव्याः चन्द्रमसश्चाविधानं दृश्यते तत्र शास्त्रे ।

**'अमा' षोडशभागेन देवि ! प्रोक्ता महाकला ।**
**संस्थिता परमा माया देहिनां देहधारिणीं ।। इति ।**

इयमेव महाकला आगमशास्त्रेषु षोडशी श्रीमहाविद्या अपि उक्ता। शशिनः अमा आरभ्य पूर्णिमापर्यन्तं सर्वाः कलाः 'षोडशी' इति पदेनापि व्यपदिश्यते । उक्तञ्च—

**'अमादिपौर्णमास्यान्ता या एव शशिनः कला ।**
**तिथयस्ताः समाख्याताः षोडशैव वरानने ।।'**

इति स्कन्दपुराणे प्रभासखण्डे उक्तम् । कालमाधवीये ग्रन्थे एतद् व्याख्यानन्तु 'महामाया आधारशक्तिरूपा देहिनां देहधारिणी सा चन्द्रमण्डलस्य षोडशभागेन परिमिता चन्द्रदेहधारिणी अमानाम्नी महाकला' इति। अतः अमात्यः समग्रामात्यगुणयुक्तः सन् राज्ञः कला राजश्री श्रीवर्धको भवति इति भावः ।

एवमेव 'अमा' अमावस्यामारभ्य पूर्णमासीपर्यन्तं क्षयोदयरहिता नित्या तिथिसंज्ञिकैव इतरा अपि पञ्चदशैव कला दिवसव्यवहारोपयोगिन्यः क्षयोदयवत्यः पञ्चदशतिथयो भवन्तीति तिथयः षोडशैव, अतश्चात्र सामान्यविशेषरूपेण तिथिद्वैवेध्यमुक्तं भवति । अमापक्षे तु कला इति पदेन 'न नीयते दृश्यते विधुरत्र सा अमावस्येति।' किञ्च अमा कालरात्रीति पदप्रयुक्ता सोमरूपिणी समस्तौषधीनां प्राप्तिका भवति। अत उक्तम्—'अमायान्तु सदा सोम-ओषधिः प्रतिपद्यते।' एवञ्च 'अमा सा या न मीयते असौ सा' इत्यत्र मा—इति पदेन कर्मणि क्विप् जातः। अमा इति शब्दः सर्वत्र पुराणेषु भगवता व्यासेन प्रतिपादितः। निरुक्ते च 'जगद्रूपगृहरूपणी' इत्युक्ता। ऋग्वेदे[२] च— 'कामश्चरताममा भूते'। भागवते च 'अमा गृहमिति' इत्युक्ता। अतः व्युत्पत्तिरपि गम्यते—'अम्यते गम्यते चन्द्रलोकाद् इत्यमा'। पुनरपि अमा-पदस्य व्यवहारो ऋग्वेदस्य पञ्चममण्डले दृश्यते[३]। भागवतेऽपि—'अमातः अस्माल्लोकात्' इत्युक्तम्। अस्मादेव कारणात् चन्द्रलोकात् (उर्ध्वलोकात्) क्षीणाः पुण्याः मर्त्यलोकं विशन्ति ।

उक्तञ्च—'क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।'

किञ्च एतस्य अमा प्रयुक्तस्य समग्रभावं हृदि निधाय परमात्मना श्रीकृष्णेन श्रीमद्भगवद्गीतायाः अष्टमाध्याये प्रोक्तम्—

**मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।**
**नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ।।**
**आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।**
**मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ।।**
**सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः ।**
**रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ।।**

**अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।**
**रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ।।**
**भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ।**
**रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ।।**
**परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः ।**
**यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ।।**[४]

श्रीमद्भगवद्गीतायामन्यत्रोक्तम्—

**या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।**
**यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ।।**[५]

एतत् प्रसङ्ग एव अर्जुनसमक्षे परमात्मना स्वविभूतीनां प्रवचनं स्वविराट्रूपञ्च प्रदर्शनं चाकारि। एतेन प्रतीयते यत् पुराणेषु यः सृष्ट्युपक्रमस्तद्दिनम्, यश्चोपसंहारः सा निशा। अस्यां निशायामपि सदा शुद्धबुद्धमुक्तो योगी रात्रावपि न स्वपिति न लीयते। अतः 'या निशा सर्वभूतानां तस्यां जागर्ति संयमी' इति भगवदुक्तिः चारितार्थ्यं भजते। शास्त्रे वेदे चेदं प्रथितमेव यत्—

**पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् ।**
**उतामृतत्वस्येशानो यदन्नेनातिरोहति ।।**[६]

एतेन अस्याः सृष्टेः दिनरात्रयोश्च सर्वं विराट्पुरुषेण जायते हीयते ह्रीयते इति सर्वं विराट्पुरुषे एव प्रतिष्ठितम्। स एव 'एकोऽहं बहु स्याम इति भगवदिच्छया जगतः पौनःपुन्येन जगतः सृष्टिः तस्मिन्नेव लयो जायते इति सर्ववेदान्तानां सर्वपुराणशास्त्रादीनाञ्चायमेव भावो बोद्धयते। अस्मिन्नेव लये लीनः परमात्मा पुनः स्वेच्छावशाद् जागर्ति । तस्मादेव विश्वयज्ञो जायते तत एव गावो अश्वादयो जायन्ते। तस्मादेव विराजः मुखेन ब्राह्मणः, बाहुभ्यां क्षत्रियः, उदराद् वैश्यः, पादाच्छूद्रोऽजायन्त इति सर्वं पुरुषसूक्तगतं भावं व्यज्यते। अत्र अमा-पदं लयबोधकं जायते। यतो हि राजनि सर्वस्वहिते लीनोऽमात्यः स्वपरामर्शेन राजानं पुरस्करोति। किञ्चेदमेवामात्यपदममापदेन संजुष्टं राज्ञो हितसाधने प्रयुक्तम्। अतः सृष्टिविस्तारे यदा मधुकैटभौ व्याघातकर्तारावभूताम्, तदा निशि सुप्तं विराट्रूपं विष्णुं दुर्गासप्तशतीस्तवे रात्रिसूक्ते—'त्वं स्वाहा, त्वं स्वधा' इत्यादिपदेन स्तुतं दृश्यते। तत्प्रभावादेव निशातोत्थितो विराडविष्णुः दिव्यपञ्चवर्षसहस्त्राणि ताभ्यां युद्धं विधाय तौ घातयति इत्यादिसर्वं शास्त्रगतं भावम् 'अमा' पदे व्यवसीयते। अयमेव भावः सूर्योपस्थापने—

**ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।**
**आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च**[७] **।।**

अयं भाव: सूर्यस्यादिर्भावो भगवत: आत्मना जात: । उदिते सूर्ये विश्वनियन्तारो देवा अभूवन् । ते च रात्रिं (अमा) विहाय उत्थिता: सन्त: सूर्यं विलोक्य विस्मृता: अभूवन् । एतेनामात्य: राजानं सूर्य इव सदा जागृणाति । अत: नीतिशास्त्रे प्रधानमन्त्रिपदवाच्यो महामात्यो राज्ञ: सर्वविधहिताय लोककल्याणाय च प्रभवतीति विस्तृतामात्यपदव्याख्यायाम् 'अमा' इति प्रतीकमादाय सर्वं शास्त्रं कोशकाव्यादिकञ्च सङ्गतं भवति ।

शुक्रनीतौ उक्तम्—यद् अमात्यै: मनसा वाचा कर्मणा स्वामिन: कार्यं सम्पादनीयम् । आचार्यकौटिल्यस्यार्थशास्त्रे अमात्यशब्दप्रयोगो राज्यस्य नियतोन्नताधिकारिवर्गस्य कृते विहित:, यस्मिन् वर्गे मन्त्रिण: कोशाध्यक्षा:, दूता:, विभिन्नविभागीयाध्यक्षा: अन्ये प्रशासनिकाधिकारिणश्च सम्मिलिता भवन्ति। आचार्यकौटिल्यस्य दृष्टौ अमात्यमन्त्रिणोर्भेदो वर्तते । आचार्यकामन्दकमतानुरोधेन मन्त्रिण: कार्यं मुख्यतया राज्ञे परामर्शदानं तत्परामर्शस्य गोपनीयत्वसम्पादनम् । अमात्यस्य कार्यं प्रशासनसञ्चालनम् । राज्याङ्गेषु निर्दिष्टामात्यपदेन मन्त्रिण उन्नताधिकारिणश्चेति द्वयोरेव ग्रहणं भवति । भगवता मनुना विचारकोटौ राज्ञ: सर्वोन्नतपदाधिकारी मन्त्री भवति । मन्त्री स एव भवति, यो राज्ञा सह रहसि निखिलमपि वृत्तं मन्त्रयते ।

अमात्यानां नियोजनं देशरक्षायामन्ताराष्ट्रियराजनीतिकसम्बन्धस्थापनाय राज्ञे परामर्शदानाय जायते । महाकविगोस्वामितुलसीदासेनापि लोकभाषायां निर्मिते रामचरितमानसे उक्तम्—

**''सचिव वैद गुरु तीनि जो प्रिय बोलहिं भय आस ।**
**राज धर्म तन तीनि कर होई वेगहिं नास ।।''**[८]

अयं भाव:—मन्त्री वास्तविकं हितं परित्यज्य राज्ञो मनोनुकूलेन राज्याहितकरेऽपि विषये स्वस्वीकृतिं विधाय तद्विचारानुकूलं यदि स्वविचारं प्रकटयति, तदा त्वरितमेव तद्राज्यं विनष्टं भवति। अत: राज्ञ: कृते सुयोग्यमन्त्रिभि: सह सुमन्त्रणा अत्यावश्यकी।

महाभारतस्य शान्तिपर्वणि आचार्यभीष्मपितामहेनोक्तं यत् किमपि राज्यं मन्त्रिणं विना दिनत्रयमपि चलितुं न शक्नोति[९], यतो हि मन्त्रिणं विना राजा राज्यसञ्चालनं कर्तुं न प्रभवति[१०]। मन्त्री कथं भवेदिति जिज्ञासायां तद्गुणानां चर्चाप्रसङ्गेन आचार्यभीष्म उक्तवान् यत् कुलीन:, सुशिक्षित:, विद्वान्, ज्ञानविज्ञानपारङ्गत:, निखिलशास्त्रतत्त्वज्ञ:, सहनशील:, स्वदेशवासी, कृतज्ञ:, बलवान्, क्षमाशील:, मनोनिग्रहीता, जितेन्द्रिय:, निर्लोभ:, स्वामिनो तन्मित्रस्य चाभ्युन्नतिचिन्तक:, देशकालज्ञ:, आलस्यरहित: सन्धिविग्रहावसरज्ञ:, जनप्रिय:, व्यूहनिर्माणकलानिपुण:, स्वसेनोत्साहवर्द्धक:, प्रवीण:, परेङ्गितज्ञानसमाहित:,

शत्रूणामुपरि आक्रमणावसरज्ञः, युद्धकलाकुशलः, निरहंकारः, निर्भयः, उदारः, संयमी, उचितकार्यसम्पादकः, प्रसन्नवदनः, नेता, नीतिकुशलः, श्रेष्ठगुणसम्बलितः, उत्तमचेष्टान्वितः उद्दण्डतारहितः, विनयशीलः, मुदुभाषी, गोप्यतत्त्वसंरक्षकः, ऐश्वर्यसम्पन्नः, देशकालानुरोधिकार्यसम्पादकश्चेत्यु-पर्युक्तनिखिलगुणगणविशिष्ट एव मन्त्रिपदार्ह इति[११]। यस्मिन् राज्ये उपर्युक्तगुणविशिष्टो मन्त्री भवति, तस्य राज्यस्य यशः चन्द्रप्रभेव प्रसरति[१२]। आचार्यकौटिल्येन मन्त्रिगुणान् तत्पदार्हताञ्च प्रतिपादयता उक्तं यत् स्वदेशप्रभवः, सत्कुलीनः, अवगुणशून्यः अवसादादिरहितः, ललितकलामर्मज्ञः, राजशास्त्रार्थशास्त्रवेत्ता, बुद्धिमान्, स्मरणशक्तिसम्बलितः, वाक्पटुः, प्रगल्भः, प्रतिवादप्रतीकारसमर्थः, उत्साही, प्रभावशाली, सहिष्णुः, पवित्रः, मित्रार्हः, दृढ़ः, स्वामिभक्तः, सुशीलः, धैर्यवान्, निरभिमानः, स्थिरप्रकृतिः प्रियदर्शी, द्वेषवृत्तिरहितश्चेत्युपर्युक्तगुणवशिष्टः पुरुषो महामात्यपदासीनो भवितुमर्हति। यस्मिन् पुरुषे महामात्यस्य निर्दिष्टगुणेषु अर्धगुणाः भवेयुः ते मध्यमन्त्रिपदार्हा इति[१३]। आचार्यभारद्वाजस्यायमभिमतो यद् राज्ञा स्वसहाध्यायिन एव अमात्यपदे नियोजनीयाः, यतो हि तत्सहपाठिनो राज्ञो हार्दभावेन सुपरिचिताः भवन्ति, तत्कार्यक्षमतामपि ते जानन्ति। एतादृशाः अमात्यराज्ञो विश्वासभाजनानि भवन्तीति[१४]। उक्तसन्दर्भे आचार्यविशालाक्षो भारद्वाजाभिमतेन सह स्ववैमत्यं प्रकटयन्नाह—युगपत्क्रीडनादिमात्रेण सहपाठिनोऽमात्यपदासीना राजानं तिरस्कर्तुं प्रभविष्यन्ति। यतो गुप्तकार्येषु राज्ञःसाहाय्यं विदधानाः समानशीलव्यसनाः गुप्तवार्ताप्रकाशनभयेन राजानं ये न तिरस्करिष्यन्ति, त एवामात्यपदार्हा इति[१५]। आचार्यपराशरमतानुरोधेन आचार्यविशालाक्षस्यामात्यचयनविषयकसिद्धान्तो दोषपूर्णः, यतो हि आचार्यविशालाक्षसिद्धान्ते यानि तत्त्वानि प्रतिपादितानि, तानि स्वाम्यमात्येति पक्षद्वयेऽपि समानरूपेण चरितार्थानि भवन्ति, तत्रेदमपि सम्भाव्यते यद् गुप्तवार्ताप्रकाशनभयेन राजा अमात्यानां काष्ठपुत्तलिका भवेद्, राजा येषां समक्षं स्वगुप्तवार्तां प्रकाशयति तावानेव शक्तिहीनः तद्वश्यश्च भवति[१६]। अतो यः पुरुषः प्राणापहारकसङ्कटात् राज्ञो रक्षां करोति, स एवामात्यपदे नियोजनीय इति, यतो हि राज्ञा स्वविषयकतदनुरागो भक्तिभावश्च परीक्षितः[१७]। आचार्यपिशुनस्यायमभिमतः विपत्तौ स्वप्राणानविचिन्त्य राज्ञः साहाय्यकरणं भक्तिभावः सेवाधर्मश्चेति बुद्धिमत्तायां प्रमाणं नास्ति। अतो बुद्धिमत्ता अमात्यगुणेषु उत्कृष्टगुणः। एवं हि अमात्यपदे स एव नियोजनीयो यः विशेषयोग्यताप्रदर्शनपुरस्सरं बुद्धिवैभवेन सकुशलं राजकार्यं सम्पादयति, एवं रीत्या तद्बुद्धिवैशिष्ट्यस्य परीक्षणमपि जायते[१८]। आचार्यकौणपदन्ताय आचार्यपिशुनसिद्धान्तो न रोचते। तस्यायमभिप्रायो यद्

वंशपरम्परानुरोधेनामात्यपदोपलब्धेषु जनेषु मध्ये तत्कार्यावसाने तद्वंशानुगतो जन एवामात्यपदार्हः, यतो हि वंशपरम्परया अमात्यकार्यगतनीत्या रीत्या च स सुपरिचितो भवति। एतदर्थं स्वस्यापकारेऽपमाने जाते सत्यपि वंशानुगतसम्बन्धानुरोधेन स जनो राजानं न विजहाति। पशुपक्षिष्वपि इदं दृश्यते, यथा गावः अपरिचितगोष्ठं परित्यज्य परिचितगोष्ठे तिष्ठन्ति[१९]। आचार्यवातव्याधिराचार्यकौणपदन्ताभिमतं न समर्थयति, तदेदं तात्पर्य यदुपर्युक्तरीत्या अमात्येव राज्ञः सर्वस्वं स्ववशीकृत्य राजेव स्वतन्त्रवृत्तिको जायते। अतो नीतिज्ञो राजा नूतनव्यक्तिविशेषमेवामात्यपदे नियोजयेत्। नवामात्येव दण्डधारिणं राजानं यमावतारं मत्वा कदाचिदपि नावमन्यते[२०]। आचार्यबाहुदन्तीपुत्रः उपर्युक्तमतं न समर्थयते, यतो हि नीतिशास्त्रपारङ्गतोऽपि क्रियात्मकानुभवशून्यो जनः राजकार्यं सम्पादयितुं समर्थो भवितुं नार्हति। अतस्तद्गतगुणानां प्राधान्यानुरोधेन ये कुलीनाः बुद्धिमन्तो विश्वासार्हाः वीराः राजभक्ताश्च सन्ति, त एवामात्यपदे नियोजितव्याः[२१]। आचार्यकौटिल्यस्य मतानुरोधेन यद्यपि समेषामाचार्याणां विचारपरम्परा तत्तत्स्थाने युक्तियुक्ततां भजते, किन्तु पुरुषसामर्थ्यप्रकाशकं तत्कार्यसाफल्यम्। कस्यापि पुरुषस्य कार्यकौशलं तद्विद्याबुद्धिबलविभवाद्यनुरोधेनानुमीयते। अतः कस्यापि पुरुषस्य तद्गतविद्या-बुद्धिसाहस-गुण-दोष-देश-काल-योग्यताद्यनुसारेण सम्यक् विचार्यामात्यपदे नियोजनं कुर्यात्[२२]।

आचार्ययाज्ञवल्क्यमतानुरोधेन ज्ञानी, अमात्यवंशपरम्पराप्राप्तः, धीरवान् पवित्रपुरुष एवामात्यपदे नियोजनीयः[२३]। भगवतः शुक्रस्यायमभितो यत् सर्वविद्यानिपुणः सम्यक्मन्त्रणा- विचारादिदक्षोऽपि एकाकी राजा मन्त्रिपरामर्शं विना कस्मिंश्चिदपि विषये कमपि निर्णयं न कुर्यात्[२४]। मन्त्रिपरिभाषां विदधान आह राजनीतिशास्त्रज्ञस्तदनुरोधिकार्य सम्पादकश्चैव जनो मन्त्रिपदे नियोक्तव्यः[२५]। मन्त्रिणा कदा कस्मिन् विषये सन्धि-दान-भेद-विग्रहादिकं करणीयम्, तत् फलञ्च किं भविष्यतीति सम्यक्परिज्ञाय राजा निवेदनीयः[२६]।

## मन्त्रिणः संख्या–

मन्त्रिणः संख्याविषयेऽस्ति वैमत्यम्। मनुमतानुसारं द्वादश, बार्हस्पत्यमतानुसारं षोडश, औशनसमतानुसारं विंशतिः मन्त्रिणः। कौटिल्यस्तु यथासामर्थ्यमावश्यकतानुसारं वा मन्त्रिणां संख्यां स्वीकरोति[२७]। दशरथस्य अष्टौ मन्त्रिणः बालकाण्डे निर्दिष्टाः मानसोल्लासानुसारं सप्तभिः अष्टभिर्वा मन्त्रिभिर्भवितव्यम्। शिवाजीमहोदयस्य अष्टौ प्रधानानि एवमासन् मुख्यः प्रधानः (प्रधानमन्त्री), पन्तः अमात्यः (वित्तमन्त्री), पन्तः सचिवः (महालेखापरीक्षकः),

सेनापतिः, मन्त्री (राज्ञः निज-सचिवः), सुमन्तः (परराष्ट्रसचिवः), पण्डित्ताव: (धर्माध्यक्षः), न्यायाधीशश्च। राजतरङ्गिण्यामेत एव मन्त्रिणः उल्लिखिताः ।

शुक्रनीतावमात्यानां कर्तव्यनिरूपणप्रसङ्गे उक्तं यद् राज्ये कति नगराणि, अरण्यानि, ग्रामाः, कियती कृषियोग्यभूमिः तत्र कियद्धान्यमधिगतम्, क्षेत्रस्य कस्मिन् भागे किमस्ति, कियती भूमिराकर्षिता, देशे प्रतिवर्षं राजस्वोऽपराधिणो दण्डदानाधिगतं द्रव्यं कियदस्ति ? वनाधिगतं द्रव्यं कियदस्ति ? खनिजद्रव्यं कियदस्ति ? स्वामिनो ज्ञातवस्तु कियदिति ? चौरेभ्यो दण्डदानरूपेणाधिगतद्रव्यं कियदिति उपर्युक्तं सर्वमपि परिगण्य अमात्यो राजानं निवेदयेत्[२८]। एवं हि सर्वेऽपि मन्त्रिणः स्वस्वविभागभारं निरवहेयुः । भगवन्मनुसिद्धान्ते पवित्रो, बुद्धिमान्, स्वस्थचित्तः, न्यायोपार्जितद्रव्यकः सम्यक्परीक्षित एव पुरुषो मन्त्रिपदे नियोक्तव्यः[२९]। राजा सन्धिविग्रहयानासनद्वैधीभावाश्रयसम्बद्धं राजकार्यं मन्त्रिभिः सह सम्यग्विमृश्य देशकाल परिस्थित्युनुरोधेन यथोचितं कुर्यात्[३०]। मनुस्मृताविदमप्युक्तं यद् राजा मन्त्रिभिः सह कपटपूर्णं न व्यवहरेत् । तैः सह सद्भावनया व्यवहरन् राष्ट्रहिताय चिन्तयेत्[३१]। तेनेदमप्युक्तं यद् राजा सहसा अस्वस्थो यदि भवति तदा राज्यस्य कार्यं सम्पादयितुं वरिष्ठः, योग्यः, धर्मज्ञः, पण्डितः, कुलीनो, जितेन्द्रियो महामात्यो राजसिंहासने उपवेशनीयः[३२]। आचार्यकामन्दकमतानुसारेणापि राज्ञा मन्त्रिभिः विमृश्यौचित्यपूर्णं कार्यं सम्पादनीयमिति[३३]।

आचार्यकौटिल्यसिद्धान्ते सामान्यपदानामुपरि अमात्यान् नियोज्य वरिष्ठमन्त्रिणां पुरोहितानाञ्च साहाय्येन राजा गोपनीयोपायोपधाद्वारा अमात्याचरणं परीक्षेत। नीतिवाक्यामृते उपधा इत्थं लक्षिता धर्माधर्मकामेषु व्याजेन परचित्तपरीक्षणमुपधा । आचार्यकामन्दकेन उपधा एवं व्याख्याता—उपेत्य धीयते यस्मादुपधेति ततः स्मृता । जयमङ्गलाटीका- कारेणोक्तम्—उपेत्य धीयत इति । भावपरीक्षणार्थमुपेत्य धीयते स्फटिकमणिवद् रागेणोपधीयत इत्युपधा उपायः, धर्माद्यालम्बना उपजापक्रिया। तयाऽमात्यान् परीक्षेत सामान्येष्वधिकरणेषु स्थापयित्वा। सन्दर्भेऽस्मिन् उपाध्यायनिरपेक्षाटीकाकारेणाप्युक्तम्—उप समीपम्, एत्य धीयते ढौक्यते यस्मादुपधेति ततः स्मृता । उपायः, उपजापप्रयोग उपधा ज्ञेया तयाऽमात्यान् परीक्षेत्[३४]। तन्मते एते गुप्तोपाया धर्मोपधार्थोपधाकामोपधाभयोपधारूपेण चतुर्विधाः सन्ति ।

**धर्मोपधा–**

अनेनोपायेन राजा कस्यचन निम्नजातिविशिष्टस्य पुरुषस्य गृहे यज्ञाध्ययनादिकार्यं सभाजयितुं पुरोहितं निवेदयेत्, यदि पुरोहितः कार्यमिदं सम्पादयितुं निषेधयति, तदा राजा पदच्युतं तं कुर्यात्। पदच्युतः पुरोहितः

स्त्रीपुरुषादिरूपेण गुप्तचरमाध्यमेन भेदनीतिद्वारा प्रतिज्ञापूर्वकं प्रत्येकममात्यं राजविद्रोहाय प्रेरयेत् । तेनेदमुक्तं स्याद् यद् अयं राजा महानधार्मिकः, अस्माभिः एतस्य स्थाने तद्वंशज एव कश्चन श्रेष्ठपुरुषः, कश्चन धार्मिकव्यक्तिविशेषः, समीपस्थः कश्चन सामन्तो वा, कश्चनारण्यस्वामी अथवा सर्वैरपि मिलित्वा निश्चेतव्यः। एवं हि सर्वाभिमतः पुरुष एव राजपदासीनो भवेत् । पुरोहितेन पुनरित्थं ते प्रेरिता भवेयुः यद् ममायं प्रस्तावः सर्वैरपि स्वीकृतः तव कोऽभिमतः ? पुरोहितवाक्यं श्रुत्वा यद्यमात्यः तद्वचनं न स्वीकुर्यात्, तदा सोऽमात्यः पवित्रहृदयः बोद्धव्यः। अनेनैव गुप्तधार्मिकोपायेन अमात्यहृदयपवित्रतायाः परीक्षणं जायते, सोऽयमुपायो धर्मोपधापदेन व्यवह्रियते[३५]।

**अर्थोपधा–**

अनेनोपायेन राजा कमपि निन्दनीयापूज्यव्यक्तिविशेषं सत्कर्तुं सेनापतिमादिशेत्, तदाज्ञां पालयितुं यदि स रुष्टो भवति तदा राजा तमपि पदच्युतं कुर्यात् । पदच्युतोऽपमानितश्च सेनापतिः गुप्तचरद्वारामात्याय धनप्रलोभं दत्वा राजविनाशाय तं प्रेरयेत् । स इत्थं वदेत्, यद् ममायं सर्वैरप्यूरीकृतः, तव कोऽभिमतः ? सेनापतेरिदं वचनं श्रुत्वा यद्यमात्यः तत्प्रस्तावविरोधं कुर्यात्तदिदं ज्ञातव्यं यद् अमात्योऽयं पवित्रहृदयो वर्तते। एवं हि अनेन गुप्तार्थिकोपायेन अमात्यहृदयपवित्रतायाः परीक्षणं भवति। सोऽयमुपायोऽर्थोपधापदेन ज्ञायते[३६] ।

**कामोपधा–**

अनेनोपायेन राजा गुप्तचररूपेण संन्यासिवेषधारिणीं कामपि स्त्रियमन्तःपुरं नीत्वा सत्कुर्यात् । सा स्त्री एकैकस्यामात्यस्यान्तिकं गत्वा वदेत् भो महामात्य ? महाराज्ञी भवतामुपरि कामासक्ता वर्तते। भवत्समागमाय सर्वापि व्यवस्था पूर्णीकृता एतदर्थं भवते यथेष्टधनं दास्यते। प्रस्तावमिमं यद्यमात्यो निषेधयेत्तदा पवित्रहृदयामात्यस्य तच्चरित्रस्य परीक्षणं जायते। उपायोऽयं कामोपधापदेन कथ्यते[३७] ।

**भयोपधा–**

अनेनोपायेन नौकाविहारायैकोऽमात्यो परामात्यमाकारयेत्, एतत्प्रस्तावानुरोधेन राजा समाविष्टो भूत्वा तान् सर्वान् दण्डयेत् । तदनन्तरं राज्ञः पूर्वमपकृतः कपटवेषधारी च कश्चन छात्रो गुप्तचरस्वरूपेण तिरस्कृतदण्डितामात्यस्यान्तिकं गत्वा ब्रूयाद् यद् दुष्टस्यास्य राज्ञो वधमस्माभिर्विधाय कश्चन अन्यः पुरुषो राजपदे नियोजनीयः, सर्वैरप्यमात्यैः स्वीकृतस्यास्य प्रस्तावस्य सन्दर्भे तव कोऽभिमतः ? प्रस्तावमिमं यदि सोऽमात्यो

विरुद्ध्यति, तदा शुद्धहृदयः स बोधनीयः। अनेन गुप्तभयसम्बद्धोपायेनामात्य-शुचितायाः परीक्षणं सम्पद्यते । उपायोऽयं भयोपधाशब्देन निरूप्यते[३८]।

आचार्यकौटिल्यमतानुरोधेन धर्मपरीक्षायां समुत्तीर्णोऽमात्यो धनकलह-सम्बद्धन्यायालये नियोजनीयः, अर्थपरीक्षायां समुत्तीर्णोऽमात्यो राजस्वकोषाध्यक्ष-पदे नियोक्तव्यः, कामोपधापरीक्षा- यामुत्तीर्णो बाह्यविलासविहाराद्यन्तः-पुरसम्बन्धिरक्षाव्यवस्थायाम्, भयोपधापरीक्षा- याञ्चोत्तीर्णोऽमात्यः स्वीयाङ्गरक्षको राज्ञा नियोजनीयः। एवं सर्वास्वपि परीक्षासु समुत्तीर्णममात्यं मन्त्रिपदे नियोजयेत्। तत्र तत्र परीक्षासु असाफल्यमधिगतानमात्यान् खनिज-हस्ति-वनादिपरिश्रमसाध्यव्यवस्थायां समायोजयेत्[३९]।

प्रायः समेषां भारतीयराजशास्त्रविदामाचार्याणामत्रायमभिमतो यद् धर्मार्थकामभयरूपासु चतुर्विधासु परीक्षासु सम्यक्परीक्षितः पवित्रहृदयोऽमात्यः तत्कार्यक्षमतानुसारेण समायोजनीयः[४०]।

आचार्यभीष्ममतानुसारेणैकस्मिन् पुरुषे राजोचितसर्वगुणोपयुक्तता संभवितुं नार्हति । अतः आवश्यकतानुसारं स्वसाहाय्यं परामर्शञ्च विधातुं राज्ञा सुयोग्यामात्यः सभाजनीयः। तथा चामात्यसहयोगमन्तरा राज्यसञ्चालना-भावाद्राज्येऽमात्यानां महत्त्वपूर्णं विशिष्टञ्च स्थानं वरीवर्तीति ।

**मन्त्रणाविधिः–**

महाभारते मन्त्रणाविधिविषये कथितम्-राजा अष्टानां मन्त्रिणां मध्ये मन्त्रयेत्[४१]। सचिवानां संख्या सप्तत्रिंशत् मन्त्रिणां चाष्टौ। न्यूनातिन्यूनं त्रिभिर्मन्त्रिभिर्भाव्यम् । रामायणे श्रीरामः भरतमपृच्छद् यत् किं त्रयः चत्वारो वा मन्त्रिणः तेन परामृष्टाः ? आचार्यकौटिल्योऽपि ईदृशमेव मन्त्रिमण्डलं निर्दिशति—'मन्त्रिभिश्चतुर्भिर्वा सह मन्त्रयेत्' । त्रयाणां चतुर्णां सप्तानां वा मन्त्रिणां मण्डलेन भवितव्यमिति उपपादयता नीति वाक्यामृतकृता (मन्त्रिसमुद्देशः) उक्तं यद् अतोऽधिकानां मन्त्रिणां करणे निर्णयस्य सर्वसम्मतिः सन्दिग्धा भवति। एतेन विवेचनेन स्पष्टं यत् त्रयाणां चतुर्णा वा सङ्घटनं मन्त्रिमण्डले यत्र नीतिविषयको निर्णयो भवति । द्वितीया मन्त्रिपरिषद् अस्ति अत्र अष्टौ, ततोऽधिका वा सदस्या भवन्ति । सर्वतो महत् सङ्घटनममात्यमण्डलस्य भवति, यत्र सप्तत्रिंशत् ततोऽधिका वा सदस्याः भवन्ति । अर्थशास्त्रे ह्युक्तम्-यस्मिन् स्थाने राजा मन्त्रभिः सह मन्त्रणां कुर्यात् तत्स्थानं परितः पिहितं स्यात्, येन पक्षिणोऽपि तत्र गन्तुं न शक्नुयुः, कश्चिदपि शब्दः बहिर्न शृणुयात् । यतो हि अनुश्रुतिरेषा श्रूयते यत् पुराकाले कस्यचिद्राज्ञो गुप्तमन्त्रणा शुकसारिकाभिः श्रुत्वा बहिः प्रकटिता, एवमेव शुना पक्षिभिश्च श्रुतं मन्त्रणं व्याघातको भवतीति श्रूयते। अत एव राज्ञः आज्ञां विना कश्चिदपि जनः कस्यामपि स्थितौ

मन्त्रणास्थले न गन्तुं शक्नुयात्, किञ्च गुप्तमन्त्रणाया भेदकर्तारं सद्य एव हन्यात्[४२]।

नागकुलजन्मनः सारिकाश्रावितमन्त्रस्य आसीन्नाशो नागसेनस्य पद्मावत्याम् । शुकश्रुतरहस्यस्य च श्रीरशीर्यत श्रुतवर्मणः श्रावस्त्याम् (हर्षचरितम् ४) । अतो गूहेत्कूर्म इवाङ्गानि रक्षेद् विवरमात्मनः (म. शा. प. ८३/४९) । मन्त्राणां गोपनीयत्वमिदमप्यावश्यकं यत् सर्वं कार्यं जातं मन्त्रिपरिषदा निर्णयेत् तत्स्वीकृतिं विना किमपि कार्यं विधातुं राजा नोत्सहेत। यदि निर्णयः सर्वसम्मत्या स्वीकृतो भवति तदा तु अतीव शोभनम्। सर्वसम्मतेरभावे तु बहुमतमाश्रयणीयम्। राज्ञा कथमपि मन्त्रिणो नोपेक्षणीयाः, ते न केवलं राज्ञो मित्राणि अपि तु गुरवोऽपि—

**सज्जमानमकार्येषु निरुन्ध्युर्मन्त्रिणो नृपम् ।**
**गुरूणामपि चैतेषां शृणुयान्नृपतिर्वचः ।।**
**नृपस्य ते हि सुहृदस्त एव गुरवो मताः ।**
**य एनमुत्पथगतं वारयन्त्यनिवारिताः ।।**
**सज्जमानमकार्येषु सुहृदो वारयन्ति ये ।**
**सत्यं न ते हि सुहृदो गुरवो गुरवो हि ते[४३] ।।**

इत्थं हि विजिगीषु राज्ञा परमहितावहमेतद् यावद्धि मन्त्रणया निश्चितं कार्यं विधातुं कालो नायात् तावद्धि गुप्तभावान् राजा हृदि गुप्तमेव रक्षेत् । मन्त्रिणामसावधानतया आहोस्वित् मद्यपानादिभिरनवधानात्तथा च स्वप्ने आकस्मिकप्रलापाद्विषयभोगलालसावसात्तथा चाभिमानाद् गुप्तमन्त्रणाः समयेन पूर्वमेव प्रथिता भवन्ति, अथवा गुप्तरहस्यं मन्त्रणाकाले मूर्ख इति शब्देनापमानितो जनो मन्त्रं प्रकाशयति । अत एव एतत्सर्वं रहस्यं हृदि निधाय राज्ञा गुप्तरहस्यानि सावधानतया रक्षणीयानि[४४]।

एतद्विषये ऋषिभारद्वाजस्य मतं वर्तते यद् मन्त्रणारहस्यं प्रकटिते सति राज्ञः तन्मन्त्रकाराणाञ्च सुरक्षा बाधिता भवति। अत एकाकिना एव राज्ञा विचारः कर्तव्यः, अन्यथा मन्त्रिणामपि मन्त्रकारा भवन्ति, तेषामपि अन्ये जनाः परामर्शदातारो भवन्ति । एतेन एतन्मन्त्रिपरम्पराकारणेन गुप्तरहस्यान्यपि प्रकाशयितुं निरन्तरं भयं जायते[४५]। अतो गुप्तमन्त्रणं राज्ञातिरिक्तं कश्चिदपि ज्ञातुं न शक्नुयात्, केवलं कार्यारम्भक एव जनः तदाभासं कर्तुं शक्नुयात्। किञ्च तेऽपि कार्यसमाप्तावेव मन्त्रणां ज्ञातुं शक्ता भवेयुः[४६]।

ऋषिभारद्वाजविपरीतमाचार्यविशालाक्षस्य मतमस्ति यदेकेनैव व्यक्तिना विचारितो मन्त्रः सिद्धिदायको न भवति। सर्वाण्येव कार्याणि प्रत्यक्षपरोक्षभेदेन विविधानि भवन्ति। राजकार्येषु मन्त्रिणामपेक्षा जायत एव। अत अज्ञातकार्यस्य

ज्ञानम्, ज्ञातस्य च कार्यस्य निश्चयः, कस्मिंश्चित्कार्ये चोत्पन्नसन्देहे विचारविमर्शेन तस्य संशयस्य निवारणम्, आंशिककार्यस्य पूर्णविचारणञ्च सर्वाण्यपि कार्याणि मन्त्रिभिः सहयोगेनैव पूरयितुं शक्यते। अतो विजिगीषुणा राज्ञा अत्यन्तं बुद्धिमद्भिः पर्याप्तञ्चानुभवशालिभिः मन्त्रिभिः सह मन्त्रणा कर्तव्या[४७]।

मन्त्रविचारविमर्शकाले राजा कमपि मन्त्रिणं नापमानितं कुर्यात्, यदि बालक एव सुष्ठु नीतियुक्तपरामर्शं दद्यात्तदा तस्य परामर्शोऽपि स्वीकुर्यात्[४८]। आचार्यविशालाक्षमतं निराकुर्वनाचार्यपराशरः निर्दिशति यद् विशालाक्षमतेन मन्त्रज्ञानं भवेन्नाम परं तद्रक्षणं न भवति, परमाचार्यचाणक्यः पूर्ववर्तिसमेषामाचार्याणां मतं प्रदूष्य निर्दिशति यद्राज्ञा त्रिभिश्चतुर्भि-रावश्यकतानुसारं वा मन्त्रिभिः सह गुप्तमन्त्रणा करणीया[४९]।

जैनसिद्धान्ते वर्णव्यवस्था अनादृता, परन्तु सोमदेवसूरिः नीतिवाक्यामृते लिखति—'ब्राह्मणक्षत्रियविशामेकतमं स्वदेशजमाचाराभिजनविशुद्धमव्यसनिनम-व्यभिचारिणमधीता- खिलव्यवहारतन्त्रमस्त्रज्ञमशेषोपाधिविशुद्धं च मन्त्रिणं कुर्वीत। समस्तपक्षपातेषु स्वदेशपक्षपातो महान् ।

याज्ञवल्क्यानुसारं यदि राज्यं पूर्णतया मन्त्रमेवाश्रयते तदा फलावाप्तिपर्यन्तं मन्त्रो राज्ञा गोपनीयः। फलेनैव मन्त्रो अनुमेयः स्यात्। तदुक्तं दिलीपवर्णनावसरे कालिदासेन—

**'तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च ।**
**फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव[५०]।।**

मन्त्रस्य गोपनीयतायाः माहात्म्यमाचार्यकौटिल्येन इत्थमुपवर्णितम्—'एकं हन्यान्न वा हन्यादिषु क्षिप्तो धनुष्मता। प्राज्ञेन तु मतिः क्षिप्तजा हन्याद्गर्भगतानपि ।'

अध्योध्याकाण्डे महाभारतस्य सभापर्वणि च मन्त्रस्यैव विजयप्रयोजकता उक्ता—'मन्त्रो विजयमूलं हि राज्ञां भवति राघव' (अयोध्याकाण्डे १००/१६)। विजयो मन्त्रमूलो हि राज्ञां भवति भारत (म. सभापर्वणि ५/२७) कौटिल्येन नीतिवाक्यामृतकृता च मन्त्रफलमेवं प्रतिपादितम्—'अनुपलब्धस्य ज्ञानमुपलब्धस्य निश्चियबलाधानमर्थद्वैधस्य संशयोच्छेदमेकदेशदृष्टस्य शेषोपलब्धिरिति मन्त्रसाध्यमेतत्। तस्माद् बुद्धिवृद्धैः सार्धमासीत् मन्त्रम्' (अर्थशास्त्रम् १/१५)। कामन्दकेनापि स्वस्य आचार्यः अनुसृतः—'सहायाः साधनोपाया विभागो देशकालयोः। विपत्तेश्च प्रतीकारः सिद्धिः पञ्चाङ्ग इष्यते' कामन्दकीयनीतिसारः (१२/३६)। कौटिल्येनाप्युक्तम्—'कर्मणामारम्भोपायः पुरुषद्रव्यसम्पद्

देशकालविभागः विनिपातप्रतीकारः कार्यसिद्धिरिति पञ्चाङ्गो मन्त्रः' (अर्थशास्त्रम् १/१४) ।

अतो राज्यशासनेऽमात्यानां (मन्त्रिणां) विशिष्टतमं स्थानं महत्त्वञ्च वर्तते। राज्यस्य सप्ताङ्गेषु मन्त्री दृगमात्यो[५१] निगद्यते। आचार्यकौटिल्यमतानुरोधेन राज्यस्य प्रायशः सर्वाणि कार्याणि अमात्यद्वारैव सञ्चालितानि भवन्ति। यद्यपि आदेशदाता भवति राजा, तथापि अमात्यानां साहाय्येन तैः सह परामृश्यैव निखिलमपि कार्यं स (राजा) सम्पादयति। अमात्यं विना राजा पङ्गुः। एकचक्रात्मकशकटमिव राजकार्यममात्यसाहाय्यमन्तरा सम्पादयितुं न शक्यते। एवं हि राज्ञा सुयोग्यममात्यं नियोज्य तत्परामर्शं हृदि निधाय सम्परीक्ष्य च राजकार्यं सञ्चालनीयमिति[५२]।

'नैकं चक्रं परिभ्रमयति,' 'सहायः समसुखदुःखः', 'मन्त्रमूलाः सर्वारम्भाः', 'मन्त्ररक्षणे कार्यसिद्धिर्भवति', 'सर्वद्वारेभ्यो मन्त्रो रक्षितव्यः,' 'मन्त्रसम्पदा राज्यं वर्धते', 'कार्यान्धस्य प्रदीपो मन्त्रः', मन्त्रचक्षुषा परिच्छिद्राण्यवलोकयन्ति', 'कार्याकार्या तत्त्वार्थदर्शिनो मन्त्रिणः' इत्यादिषु चाणक्यसूत्रेषु अमात्यस्य आवश्यकत्वमुपादेयत्वं, स्थानं, महत्त्वं, वैशिष्ट्यञ्च दरीदृश्यते। अतो राज्ञः पथप्रदर्शकोऽमात्य एव वरीवर्तीति शम्।

अध्यक्षः
प्राचीनराजशास्त्रार्थशास्त्रविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी ।

**सन्दर्भाः**

१. कौटिलीयार्थशास्त्रम् १/७ ।
२. ऋग्वेदः २/३८/६ ।
३. अमातोमरुतोवि आन्तरिक्षादमायुत । ऋग्वेदः ५/५०/५८
४. श्रीमद्भगवद्गीता ८/१५-२०
५. श्रीमद्भगवद्गीता २/६९
६. ऋग्वेदः पुरुषूक्तम्-२ ।
७. यजुर्वेदः ७/४२ ।
८. रामचरितमानसे ५/३८।
९. न राज्यमनमात्येन शक्यं शास्तुमपि त्र्यहम् ॥ म. शा. प. १०६/११ ।
१०. न शक्यं ह्यनमात्येन महत्त्वमनुशासितुम् ।

दुष्टामात्येन वा वीर शरीरपरिपन्थिना ॥ म. शा. प. १११/२२ ।

११. कुलीनं शिक्षितं प्राज्ञं ज्ञानविज्ञानपारगम् ।
सर्वशास्त्रार्थतत्त्वज्ञं सहिष्णुं देशजं तथा ॥
कृतज्ञं बलवन्तं च क्षान्तं दान्तं जितेन्द्रियम् ।
अलुब्धं लुब्धसन्तुष्टं स्वामिमित्रबुभूषकम् ॥
सचिवं देशकालज्ञं सत्त्वसङ्ग्रहणे रतम् ।
सततं युक्तमनसं हितैषिणमतन्द्रितम् ॥
युक्तिचारं स्वविषये सन्धिविग्रहकोविदम् ।
राज्ञस्त्रिवर्गवेत्तारं पौरजानपदप्रियम् ॥
खातकव्यूहतत्त्वज्ञं बलहर्षणकोविदम् ।
इङ्गिताकारतत्त्वज्ञं यात्राज्ञानविशारदम् ॥
हस्तिशिक्षासु तत्त्वज्ञमहङ्कारविवर्जितम् ।
प्रगल्भं दक्षिणं दान्तं बलिनं युक्तकारिणम् ॥
चौक्षं चौक्षजनाकीर्णं सुमुखं सुखदर्शनम् ।
नायकं नीतिकुशलं गुणचेष्टासमन्वितम् ॥
अस्तब्धं पसृतं श्लक्ष्णं मृदुवादिमेव च ।
धीरं शूरं महर्द्धिं च देशकालोपपादकम् ॥ म. शा. प. ११८/७-१४ ।

१२. सचिवं यः प्रकुरुते न चैनमवमन्यते ।
तस्य विस्तीर्यते राज्यं ज्योत्स्ना ग्रहपतेरिव ॥ म. शा. प.११८/१५

१३. ''जानपदोऽभिजातः स्वग्रहः कृतशिल्पचक्षुष्मान् प्राज्ञो धारयिष्णुर्दक्षो वाग्मी प्रगल्भः प्रतिपत्तिमानुत्साहप्रभावयुक्तः क्लेशसहः शुचिर्मैत्रो दृढभक्तिः शीलबलारोग्यसत्त्वसंयुक्तः स्तम्भचापल्यवर्जितः संप्रियो वैराणामकर्तेत्यमात्यसम्पत् । अतः पादार्धगुणहीनौ मध्यमावरौ''।

(कौटिल्यार्थशास्त्रम्-१/८) ।

१४. ''सहाध्यायिनोऽमात्यान् कुर्वीत, दृष्टशौचसामर्थ्यत्वादिति भारद्वाजः । ते ह्यस्य विश्वास्या भवन्तीति ।'' कौटिल्यार्थशास्त्रम्-१/७

१५. ''नेति विशालाक्षः। सहक्रीडितत्वात् परिभवन्त्येनम् । ये ह्यस्य गुह्यसधर्माणस्तानमात्यान् कुर्वीत, समानशीलव्यसनत्वात् । ते ह्यस्य मर्मज्ञभयान्नापराध्यन्तीति।'' (कौटिल्यार्थशास्त्रम्—१/७)

१६. ''यावद्भयो गुह्यमाचष्टे जनेभ्यः पुरुषाधिपः ।
अवशतेः कर्मणा तानवश्यो भवति तावताम् । कौटिलीयार्थशास्त्रम् १/६ ।

१७. ''य एनमापत्सु प्राणाबाधयुक्तास्वनुगृहणीयुस्तानमात्यान् कुर्वीत, दृष्टानुरागत्वादिति ।''

(कौटिल्यार्थशास्त्रम्-१/७)

१८. ''नेति पिशुनः । भक्तिरेषा न बुद्धिगुणः । संख्यातार्थेषु कर्मसु नियुक्ता ये यथादिष्टमर्थं सविशेषं वा कुर्यस्तानमात्यान् कुर्वीत, दृष्टगुणत्वादिति ।'' (कौटिल्यार्थशास्त्रम्-१/७)

१९. ''नेति कौणपदन्तः । अन्यैरमात्यगुणैरयुक्ता ह्येते । पितृपैतामहानमात्यान् कुर्वीत, दृष्टापदानत्वात् । ते ह्येनमपचरन्तमपि न त्यजन्ति, सगन्धत्वात् । अमानुषेष्वपि चैतद्

दृश्यते-गावो ह्यसगन्धं गोगणमतिक्रम्य सगन्धेष्वेवावतिष्ठन्ते इति ।''
(कौटिल्यार्थशास्त्रम्-१/७)

२०. ''नेति वातव्याधि: । ते ह्यस्य सर्वमपगृह्य स्वामिवत् प्रचरन्तीति । तस्मान्नीतिविदो नवानमात्यान् कुर्वीत । नवास्तु यमस्थाने दण्डधरं मन्यमाना नापराध्यन्तीति ।''(कौटिल्यार्थशास्त्रम्-१/७)

२१. ''ने ति बाहुदन्तीपुत्र: । शास्त्रविददृष्टकर्मा कर्मसु विषादं गच्छेत् ।
अभिजनप्रज्ञाशौचशौर्यानुराग- युक्तानमात्यान् कुर्वीत, गुणप्राधान्यादिति ।''
(कौटिल्यार्थशास्त्रम्—१/७)

२२. ''सर्वमुपपन्नमिति कौटिल्य: । कार्यसामर्थ्याद्धि पुरुषसामर्थ्यं कल्प्यते सामर्थ्यञ्च ।''
कौटिल्यार्थशास्त्रम्-१/७ ।

२३. ''स मन्त्रिण: प्रकुर्वीत प्राज्ञान्मौलान् स्थिरान् शुचीन् ।
तै: सार्धं चिन्तयेद्राज्यं विप्रेणाथ तत: स्वयम् ।।''—याज्ञवल्क्यस्मृति:—१/३/२

२४. ''सर्वविद्यासु कुशलो नृपो ह्यपि सुमन्त्रवित् ।
मन्त्रिभिस्तु विना मन्त्रं नैकोऽर्थं चिन्तयेत्क्वचित् ।।'' —शुक्रनीति:—२/२ ६.

२५. ''मन्त्री तु नीतिकुशल: पण्डितो धर्मतत्त्ववित् ।।'' —शुक्रनीति:-२/८५

२६. ''सामदानञ्च भेदश्च दण्ड: केषु कदा कथम् ।
कर्तव्य: किं फलं तेभ्यो बहुमध्यं तथाल्पकम् ।।
एतत्सञ्चिन्त्य निश्चित्य मन्त्री सर्वं निवेदयेत् ।।'' —शुक्रनीति:—२/९६

२७. मन्त्रिपरिषदं द्वादशामात्यान् कुर्वीतेति मानवा: । षोडशेति बार्हस्पत्या: । विंशतिमित्यौशनसा: । यथासामर्थ्यमिति कौटिल्य: । (कौटिलीयार्थशास्त्रम् १/१४)
द्वादशेति मनु: प्राह षोडशेति बृहस्पति: ।
उशना विंशतिरिति मन्त्रिणां मन्त्रिमण्डलम् ।। (कामन्दकीयनीतिसार: १२/४८)

२८. ''पुराणि च कति ग्रामा अरण्यानि च सन्ति हि ।
कर्षिता कति भू: केन प्राप्तो भागस्तत: कति ।।
भागशेषं स्थितं कस्मिन्कत्यकृष्टा च भूमिका ।
भागद्रव्यं वत्सरेऽस्मिञ्छुल्कदण्डादिजं कति ।।
अकृष्टपच्यं कति च कति चारण्यसम्भवम् ।।
कति चाकरसञ्जातं निधिप्राप्तं कतीति च ।।
अस्वामिकं कति प्राप्तं नाष्टिकं तस्कराहृतम् ।।
सञ्चितं तु विनिश्चित्यामात्यो राज्ञे निवेदयेत् ।। (—शुक्रनीति:-२/१०४-१०७ ।)

२९. ''अन्यानपि प्रकुर्वीत् शुचीन्प्राज्ञानवस्थितान् ।
सम्यगर्थसमाहर्तॄनमात्यान्सुपरीक्षितान् ।।'' —मनुस्मृति:-७/६० ।

३०. ''तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक् पृथक् ।
समस्तानां च कार्येषु विदध्याद्धितमात्मन: ।।
सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता ।।
मन्त्रयेत्परमं मन्त्रं राजा षाड्गुण्यसंयुतम् ।।'' —मनुस्मृति:-७/५७-५८ ।

३१. ''अमात्यैव वर्तेत न कथञ्चन मायया ।

बुद्ध्येतारिप्रयुक्तां च मायां नित्यं स्वसंवृतः ।।'' —मनुस्मृतिः-७/१०४ ।

३२. ''अमात्यमुख्यं धर्मज्ञं प्राज्ञं दान्तं कुलोद्गतम् ।
स्थापयेदासने तस्मिन्खिन्नः कार्ये क्षणे नृणाम् ।।'' —मनुस्मृतिः-१/१४ ।

३३. ''प्रचारयेन्मन्त्रविदः कार्यद्वारेषु नैकधा ।
यत्र तच्चेतसां साम्यं तेषु साधु समुत्पतेत् ।। कामन्दकीयनीतिसारः-१२/३८ ।

३४. कामन्दकीयनीतिसारः ४/२६ ।

३५. ''पुरोहितमयाज्ययाजनाध्यापने नियुक्तममृष्यमाणं राजावक्षिपेत् । सत्रिभिः शपथपूर्वमेकैकममात्य- मुपजापयेत्-अधार्मिकोऽयं राजा, साधु धार्मिकमन्यमस्य तत्कुलीनमवरुद्धं कुल्यमेकप्रग्रहं सामन्तमाटविकमौपपादिकं वा प्रतिपादयामः । सर्वेषामेतद्रोचते, कथं वा तवेति ? प्रत्याख्याने शुचिरिति धर्मोपधा ।''
—कौटिल्यार्थशास्त्रम्-१/९ ।

३६. ''सेनापतिग्रसत्प्रतिरहणावक्षिप्तः सत्त्रिभिरेकैकममात्यमुपजापयेल्लोभनीयेनार्थेन राजविनाशाय-सर्वेषामेतद्रोचते, कथं वा तवेति ? प्रत्याख्याने शुचिरित्यर्थोपधा ।
—कौटिल्यार्थशास्त्रम्-१/९ ।

३७. ''परिव्राजिका लब्धविश्वासान्तःपुरे कृतसत्कारा महामात्यमेकैकमुपजपेत्-राजमहिषी त्वां कामयते। कृतसमागमोपाया महानर्थश्च ते भविष्यतीति । प्रत्याख्याने शुचिरिति कामोपधा ।''

कौटिल्यार्थशास्त्रम्-१/९ ।

३८. ''प्रवहणनिमित्तमेकोऽमात्यः सर्वानमात्यानावाहयेत् । तेनोद्वेगेन राजा तानवरुन्ध्यात् । कापटिकच्छात्रः पूर्वावरुद्धस्तेषामर्थमानावक्षिप्तमेकैकममात्यमुपजपेत् -असत्प्रवृत्तोऽयं राजा, सहसैनं हत्वाऽन्यं प्रतिपादयामः । सर्वेषामेतद्रोचते, कथं वा तवेति ? प्रत्याख्याने शुचिरिति भयोपधा ।'' कौटिलीयार्थशास्त्रम् १/९ ।

३९. ''तत्र धर्मोपधाशुद्धान् धर्मस्थीयकण्टकशोधनेषु स्थापयेत्, अर्थोपधाशुद्धान् समाहर्तृसन्निधातृनिचयकर्मसु, कामोपधाशुद्धान् बाह्याभ्यन्तरविहाररक्षासु, भयोपधाशुद्धानासन्नकार्येषु राज्ञः । सर्वोपधाशुद्धान् मन्त्रिणः कुर्यात् । सर्वत्राशुचीन् खनिजद्रव्यहस्तिवनकर्मान्तेषूपयोजयेत् ।''

(कौटिल्यार्थशास्त्रम्-१/९)

४०. ''त्रिवर्गभयसंशुद्धानमात्यान् स्वेषु कर्मसु ।
अधिकुर्याद् यथाशौचमित्याचार्या व्यवस्थिताः ।।''कौटिल्यार्थशास्त्रम्-१/९ ।

४१. चतुरो ब्राह्मणान् वैद्यान् प्रगल्भान् स्नातकान् शुचीन् ।
क्षत्रियांश्च तथा चाष्टौ बलिः शस्त्रपाणिनः ।।
वैश्यान् वित्तेन सम्पन्नानेकविंशतिसंख्यया ।
त्रींश्च शूद्रान् विनीतांश्च शुचीन् कर्मणि पूर्वके ।।
अष्टाभिश्च गुणैर्युक्तं सूतं पौराणिकं तथा ।
पञ्चाशद् वर्षवयसं प्रगल्भमनसूयकम् ।।
श्रुतिस्मृतिसमायुक्तं विनीतं समदर्शिनम् ।
कार्ये विवदमानानां शक्तमर्थेष्वलोलुपम् ।।

वर्जितं चैव व्यसनैः सुधोरैः सप्तभिर्भृशम् ।
अष्टानां मन्त्रिणां मध्ये मन्त्रं राजोपधारयेत् ।। (म. शा. प. ८५/८-१२)

४२. तदुद्देशः संवृतः कथानामनिःस्त्रावी पक्षिभिरप्यनालोक्यः स्यात् । श्रूयते हि शुकसारिकाभिर्मन्त्रो भिन्नः श्वभिरन्यैश्च तिर्यग्योनिभिः । तस्मान्मन्त्रोद्देशमनायुक्तो नोपगच्छेत्। उच्छिद्येत मन्त्रभेदी ।

(कौटिलीयार्थशास्त्रम् १/१४)

४३. कामन्दकीयनीतिसारः ४/३९,४२-४३ ।

४४. तस्य संवरणमायुक्तपुरुषरक्षणमाकार्यकालादिति । तेषां हि प्रमादमदसुप्तप्रलापकामादिरुत्सेकः प्रच्छन्नोऽवमतो वा मन्त्रं भिनत्ति । तस्माद् रक्षेन्मन्त्रम् । (कौटिलीयार्थशास्त्रम् १/१४)

४५. मन्त्रभेदो ह्ययोगक्षेमकरो राज्ञस्तदायुक्तपुरुषाणां च । तस्माद् गुह्यमेको मन्त्रयेतिति भारद्वाजः । मन्त्रिणामपि हि मन्त्रिणो भवन्ति । तेषामप्यन्ये । सैषा मन्त्रिपरम्परा मन्त्रं भिनत्ति।

(कौटिलीयार्थशास्त्रम् १/१४)

४६. तस्मान्नास्य परे विद्युः कर्म किञ्चिच्चिकीर्षितम् ।
आरब्धारस्तु जानीयुरारब्धं कृतमेव वा ।। (कौटिलीयार्थशास्त्रम् १/१४)

४७. नैकस्य मन्त्रसिद्धिरस्तीति विशालाक्षः । प्रत्यक्षपरोक्षानुमेया हि राजवृत्तिः । अनुपलब्धस्य ज्ञानमुपलब्धस्य निश्चयबलाधानमर्थद्वैधस्य संशयच्छेदनमेकदेशदृष्टस्य शेषोपलब्धिरिति मन्त्रिसाध्यमेतत् । तस्माद् बुद्धिवृद्धैः सार्धमासीन्मन्त्रम् ।

(कौटिलीयार्थशास्त्रम् १/१४)

४८. न कञ्चिदवमन्येत सर्वस्य शृणुयान्मतम् ।
बालस्याप्यर्थवद् वाक्यमुपयुञ्जीत पण्डितः ।।

(कौटिलीयार्थशास्त्रम् १/१४)

४९. नेति कौटिल्यः । अनवस्था ह्येषा मन्त्रिभिस्त्रिभिश्चतुर्भिर्वा सह मन्त्र्येत ।
देशकालकार्यवशेन त्वेकेन सह द्वाभ्यामेको वा यथासामर्थ्यं मन्त्रयेत ।

(कौटिलीयार्थशास्त्रम् १/१४)

५०. रघुवंशमहाकाव्यम् १/२० ।

५१. शुक्रनीतिसारः १/६२ ।

५२. सहायसाध्यं राजत्वं चक्रमेकं न वर्तते।
कुर्वीत सचिवांस्तस्मात्तेषां च श्रणुयान्मतम्।। (कौटिलीयार्थशास्त्रम् १/६)

----xxx----